बालो वेदाय तद्योगाद्बालस्योपनयं विदुः" ॥*॥ तत्पर्य्यायः । वटूकरणम् २ । इति त्रिकाण्डशेषः ॥ उपनायः ३ उपनयः ४ आनयः ५ । इति हेमचन्द्रः ॥ तस्य कालः ।

"गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम् ।
राज्ञामेकादशे सैके विशामेके यथाकुलम् ।
ब्रह्मवर्च्चसकामस्य कार्य्यं विप्रस्य पञ्चमे" ॥

ब्राह्मणस्य गर्भावधिषोड़शवर्षपर्य्यन्तम् ॥ तत्र गर्भाष्टमवर्षो मुख्यः । क्षत्त्रियस्य द्वाविंशतिवर्षपर्य्यन्तम् । तत्रैकादशवर्षो मुख्यः । वैश्यस्य चतुर्व्विंशतिवर्षपर्य्यन्तम् । तत्र द्वादशवर्षो मुख्यः । इति स्मृतिः ॥ सैके द्वादशे । तत्राशक्तौ प्रायश्चित्तं कृत्वा तदुत्तरे कार्य्यम् ।

"गृह्योक्तकर्म्मणा येन समीपं नीयते गुरोः ।
बालो वेदाय तद्योगाद्बालस्योपनयं विदुः ॥
रक्तस्रावे तथा शस्त्रक्षते पाठनिषेधनात् ।
उपनयनं न तत्र स्यात् इति मन्वादिसम्मतम्" ॥

कृत्यचिन्तामणौ ।

"जन्मोदये जन्मसु तारकासु
मासेऽथवा जन्मनि जन्मभे वा ।
व्रतेन विप्रो न बहुश्रुतोऽपि
विद्याविशेषैः प्रथितः पृथिव्यां ॥
अस्तं गते दैत्यगुरौ गुरौ वा
ऋक्षेऽपि वा पापयुतेऽप्यनुक्ते ।
व्रतोपनीतो दिवसे प्रणाशं
प्रयाति देवैरपि रक्षितो यः" ॥

उदये लग्ने । व्रतेन उपनयनेन । भुजबलभीमकृत्यचिन्तामण्योः ।

"स्वातीशक्रधनाश्विमित्रकरभे पौष्णेज्यचित्राहरिब्रिन्दौ तोयपतौ भगे दितिसुते भाद्रद्वये सागरे ।
केन्द्रस्थे भृगुजेऽङ्गिरःशशिसुते चन्द्रे च तारे शुभे
कर्त्तव्यं व्रतकर्म्म मङ्गलतिथौ वाराः सितार्केज्यकाः" ॥

तोयपतिः शतभिषा । अदितिसुतउत्तरफल्गुनी । सागरः पूर्व्वाषाढ़ा । दीपिकायाम् ।

जीवार्केन्दूडुशुद्धौ हरिशयनबहिर्भास्करे चोत्तरस्थे,
स्वाध्याये वेदवर्णाधिपदृढ़शुभदे चौरिभे नादितौ च ।
शुक्लार्केज्यर्क्षलग्ने रविमदनतिथिं प्रोह्य षष्ठाष्टमेन्दुं,
नो जीवास्तातिचारेऽर्कसितगुरुदिने कालशुद्धौ व्रतं स्यात्" ॥

रविमदनतिथिं सप्तमीं त्रयोदशीम् ॥ * ॥ कृत्यचिन्तामणौ ।

"माघे द्रविणशीलाढ्यः फाल्गुने च दृढ़व्रतः ।
चैत्रे भवति मेधावी वैशाखे कोविदो भवेत् ॥
ज्यैष्ठे गहननीतिज्ञ आषाढ़े क्रतुभाजनः ।
शेषेष्वन्येषु रात्रिः स्यान्निषिद्धं निशि च व्रतम्" ॥

राजमार्त्तण्डे ।

"पुनर्व्वसौ कृतो विप्रः पुनःसंस्कारमर्हति" ।

वृद्धगर्गः ।

"स्मृतियुक्ताननध्यायान् सप्तमीञ्च त्रयोदशीम् ।
पञ्चयोर्माघमासस्य द्वितीयां परिवर्ज्जयेत्" ॥

चैत्रशुक्लतृतीया आषाढ़शुक्लदशमी मन्वन्तरादित्वेन निषिद्धा वैशाखशुक्लतृतीया युगादित्वेन निषिद्धेति । षष्ठामशुचिरमार्थ्यौ रिक्तासु बहुदोषभाक् । शुक्लपक्ष एव विहितः प्रागुक्ताश्वलायनवचनात् ॥ * ॥ सामगानां कुजवारेऽप्युपनयनं श्रीपतिरत्नमालाकृत्यचिन्तामणिघृतवात्स्यवचनात् । यथा ।

"शाखाधिपे बलिनि केन्द्रगतेऽथ वास्मिन्
वारेऽस्य चोपनयनं कथितं द्विजानाम् ।
नीचस्थितेऽरिगृहगेऽथ पराजिते वा
जीवे भृगावुपनयः स्मृतिकर्म्महीनः" ॥

अस्य शाखाधिपस्य ॥ दीपिकायां ।

"ऋग्वेदाधिपतिर्जीवो यजुर्व्वेदाधिपः सितः ।
सामवेदाधिपो भौमः शशिजोऽथर्व्ववेदराट्" ॥

वेदाधिपकथनम् ॥ * ॥

"ब्राह्मणे शुक्रवागीशौ क्षत्त्रिये भौमभास्करौ ।
चन्द्रो वैश्ये बुधः शूद्रे पतिर्मन्दोऽन्त्यजे जने" ॥

वर्णाधिपकथनम् ॥ * ॥ पराजयलक्षणं वक्ष्ये यात्रायाम् ।

अत्रापि विवाहवद्दशयोगभङ्गवर्ज्जनम् । विष्णुधर्म्मोत्तरे ।

"षोड़शाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः ।
विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता ॥
सावित्री नातिवर्त्तेत अत ऊर्द्ध्वं निवर्त्तते" ॥

अत्र षोड़शवर्षस्य उपनयनाङ्गता प्रतीयते ॥

"पतिता यस्य सावित्री दशवर्षाणि पञ्च च ।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः ॥
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः" ॥

इति यमवचने तदनङ्गता प्रतीयते । अनयोर्गर्भजन्मप्रभृतिगणनाभ्यामविरुद्धार्थता । तथाच माण्डव्यः । "व्रतबन्धविवाहे च वत्सरपरिकल्पनमाहुराचार्य्याः । आधानपूर्व्वमेके प्रसूतिपूर्व्वं सदान्ये तु" ॥ * ॥ यत्तु द्विजानुपक्रम्य पैठिनसिवचनं द्वादशषोड़शविंशतिस्वेदतीता अवरुद्धकाला भवन्ति इति द्वादशवर्षाद्युपरि ब्राह्मणादीनां महाव्याहृतिहोमप्रायश्चित्तार्थम् । षोड़शोपरि तु व्रात्यहोमादिगुरुप्रायश्चित्तार्थमिति । इत्युपनयनम् । इति ज्योतिस्तत्त्वम् ॥

अथ उपनयनस्यानुष्ठानक्रमः ।

तत्र प्रथमं प्रातः कृतस्नानः कृतवृद्धिश्राद्धः पिता कृतवृद्धिश्राद्धेन पित्रान्यएवाचार्य्यो वृतस्तदसम्भवे माणवकस्ततो वा समुद्भवनामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य माणवकं प्रातर्भोजयित्वा अग्न्युत्तरतो नीत्वा शिखया सह मुण्डितं स्नापितं कुण्डलाद्यलङ्कृतं क्षौमवस्त्रावृतं तदसम्भवे शुक्लाहतकार्पासैकवस्त्रावृतं माणवकं दक्षिणे पूर्व्वाभिमुखं निधाय प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा तत्तन्मन्त्रैर्व्यस्तसमस्तमहाव्याहृतिहोमं कुर्य्यात् । तत आचार्य्यः पञ्चभिर्म्मन्त्रैः पञ्चाहुतीर्जुहुयात् । तत आचार्य्यः उदगग्रेषु कुशेषु कृताञ्जलिः प्राङ्मुख ऊर्द्ध्वस्तिष्ठेत् । अग्न्याचार्य्ययोर्म्मध्ये माणवकोऽपि कृताञ्जलिराचार्य्याभिमुख उदगग्रेषु कुशेषु ऊर्द्ध्वस्तिष्ठेत् । माणवकस्य दक्षिणतः स्थितो मन्त्रवान् ब्राह्मणो माणवकस्य अञ्जलिमुदकेन पूरयति पश्चात् आचार्य्यस्यापि । ततो गृहीतजलाञ्जलिराचार्य्यो गृहीतजलाञ्जलिं माणवकं पश्यन् मन्त्रं जपति । तत आचार्य्यो माणवकं मन्त्रं पाठयति । ततो माणवकस्याभिवादनार्थं देवताश्रयं नक्षत्राश्रयं गोत्राश्रयं वा माणवकनाम कल्पयित्वा आचार्य्यो माणवकं कथयति । तत आचार्य्यो माणवकं मन्त्रेण नामधेयं पृच्छति । माणवकः पूर्व्वाचार्य्यकल्पितं नाम मन्त्रेण कथयति । तत आचार्य्यमाणवकौ पूर्व्वगृहीतजलाञ्जली त्यजेताम् । आचार्य्यस्तु दक्षिणेन पाणिना माणवकस्य साङ्गुष्ठं दक्षिणं पाणिं मन्त्रेण गृह्णाति । ततो गृहीतमाणवकहस्तो मन्त्रं जपत्याचार्य्यः । ततो माणवकमाचार्य्यो मन्त्रेण प्रदक्षिणेन भ्रामयित्वा प्राङ्मुखं करोति । ततो माणवकस्य दक्षिणस्कन्धं स्पृष्ट्वा अवतीर्णेन दक्षिणपाणिना अव्यवहितं नाभिदेशं आचार्य्यो मन्त्रेण स्पृशति । ततो माणवकस्य नाभेरुपरिदेशं मन्त्रेण आचार्य्यः स्पृशति । ततो माणवकहृदयदेशं मन्त्रेणाचार्य्यः स्पृशति । ततो दक्षिणे पाणिना आचार्य्यो माणवकस्य दक्षिणस्कन्धं स्पृशन् मन्त्रं जपति । ततो वामेन पाणिना माणवकस्य वामस्कन्धं स्पृशन्नाचार्य्यो मन्त्रं जपति । अथाचार्य्यो माणवकं मन्त्रेण सम्बोधयति । अथ सम्बोधितं माणवकं आचार्य्यो मन्त्रेण प्रेषयति । ब्रह्मचारी तु सर्व्वत्र वाढ़मिति ब्रूयात् । ततोऽग्नेरुत्तरभागे गत्वा आचार्य्यं उदगग्रेषु कुशेषु प्राङ्मुख उपविशति । तत आचार्य्याभिमुखो माणवकः पातितदक्षिणजानुः उदगग्रेषु कुशेषु उपविशति । ततः प्रवरसंख्यया पञ्च वा त्रयो वा मेखलायज्ञोपवीतरूपग्रन्थयः कर्त्तव्याः । अथैनं माणवकमाचार्य्यस्त्रिःप्रदक्षिणं कारयित्वा त्रिवृतां मुञ्जमेखलां परिधापयन् मन्त्रद्वयं वाचयति । ततो यज्ञोपवीतं कृष्णसाराजिनान्वितं आचार्य्यो माणवकं मन्त्रेण परिधापयेत् । ततो माणवक आचार्य्यस्य उपसन्नो भवति । ततस्तमुपसन्नमाणवकं आचार्य्यः प्रथमं पादं पादं ततोऽर्द्धमर्द्धं ततः कृत्स्नां सावित्रीं अध्यापयेत् । तत आचार्य्यो माणवकं महाव्याहृतीः पृथक् पृथक् कृत्वा प्रणवपूर्व्विका अध्यापयेत् । ततो वैल्वं पालाशं वा माणवकपरिमाणदण्डं माणवकाय प्रयच्छन् आचार्य्यो माणवकं मन्त्रं वाचयति । अथ गृहीतदण्डो ब्रह्मचारी प्रथमं मातरं भिक्षां प्रार्थयति । ततो मातृबन्धून् ततः पितरं ततः पितृबन्धून् ततोऽन्यांश्च प्रार्थयेत् । ततः सर्व्वं लब्धभैक्षं आचार्य्याय निवेदयेत् । ततः पूर्व्ववदाचार्य्यो व्यस्तसमस्तमहाव्याहृतिहोमं कृत्वा प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य उदीच्यं शाट्यायनहोमादिवामदेव्यगानान्तं कर्म्म निर्व्वर्त्तयेत् । ततः यदि पितैवाचार्य्यस्तदा कर्म्मकारयितृब्राह्मणाय दक्षिणां दद्यात् । अथान्य-